नुयाद्भद्रे ! नारायणपरायणा। पक्षमासप्रीणनं कार्य्यं यथाशक्त्या च वै हरेः। पारणान्ते महाभागे ! भोजयेद् ब्राह्मणोत्तमान्”।

सुकुलत्रिरात्रव्रतं विष्णुधर्म्मोत्तरे “त्र्यहस्पृगदिवसं प्राप्य त्रिरात्रोपोषितो नरः। मार्गशीर्षात्तथारभ्य पूजयेत् तु त्रिविक्रमम्। त्रिवर्णैः कुसुमैर्देवं त्रिभिः प्रयतमानसः”। त्रिवर्णैः श्वेतपीतरक्तैः “त्रयोऽनुलेपना देयास्त्रिवारं धूपमेव च”। त्रिवारं गुग्गुलुकुङ्कुमश्रीवेष्टकाः “बलिं त्रिमधुरं दद्यात् त्रींश्च दीपान्नरोत्तम !। यवैस्तिलैस्तथा होमः कर्त्तव्यः सर्षपान्वितैः। दद्यात्त्रिलोहञ्च तथा द्विजेभ्यः ताम्रं सुवर्णं रजतञ्च राजन् !। न केवलं सुकुलदं व्रतन्तु यथेष्टकामाप्तिकरं प्रदिष्टम्”।

सुकृतद्वादशीव्रतं विष्णुधर्म्मोत्तरे “तथेयं द्वादशी शस्ता नृणां सुकृतकर्म्मणाम्। यामुपोष्य द्विजश्रेष्ठ ! न याति नरकं नरः। फाल्गुनामलपक्षस्य एकादश्यामुपोषितः द्वादश्यां च द्विजश्रेष्ठ ! पूजयेन्मधुसूदनम्। एकादश्यां समुत्तिष्ठन् विष्णोर्नामानुकीर्त्तनम्। पूजायां वासुदेवस्य कुर्वीत सुसमाहितः”।

सुखव्रतं भविष्यपु० “कृष्णाष्टमीं तु नक्तेन यस्तु कृष्णां च सप्तमीम्”। उपवसेदिति शेषः “इहैव सुखमाप्नोति परत्र च शुभां गतिम्”। विष्णुधर्म्मोत्तरे “देवानां मानवानां वा तत्प्रच्छाये तथा परे। तेषां संपूजनं कृत्वा चतुर्द्दश्यां सुखी भवेत्”। भविष्यपु० चतुर्थी तु चतुर्थी तु यदाङ्गारकसंयुता। उपोष्य तत्र तत्रैव प्रदेयो विधिवत् कुजः। उपोष्य नक्तेन विभो ! चतस्रः कुजसंयुताः। चतुर्थ्यान्तु चतुर्थ्यान्तु विधानं शृणु यादृशम्”। एकश्चतुर्थीशब्दः तिथिविशेषवचनः, अपरस्तत् संख्यापर इति “दशसौवर्णिके सुवर्णं दद्याद्वाप्यर्द्धमथापि वा। सौवर्णपात्रे रौप्ये वा शक्त्या ताम्रमयेऽपि वा। विंशत्पलानि पात्राणि विंशत्यर्द्धपलानि च। विंशत्कर्षाणि वा वीर ! अतोहीनं न कारयेत्। शक्त्या वित्तस्य भक्त्या च पात्रे ताम्रमयेऽपि वा। प्रतिष्ठाप्य कुजपात्रे रक्तवस्त्रेण वेष्टयेत्। पुष्पमण्डपिकां कृत्वा दिव्यैर्धूपैस्तु धूपिताम्। तत्रस्थमर्च्चयेद्देवं पूर्वमन्त्रैः क्रमेण तु”।

सुखषष्ठीव्रतं विष्णुधर्म्मोत्तरे “ऋषीणां पूजनं कृत्वा षष्ठ्यां सुखमवाप्नुयात्”।

सुखसुप्तिव्रतं आदित्यपु० “अमावास्यान्तु देवाश्च कार्त्तिके मासि केशवम्। अभयं प्राप्य सुप्तास्तु सुखात् क्षीरोदसानुषु। लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ता भुजोदरे। चतुर्भुजस्य हस्तान्ते ब्रह्मा सुप्तस्तु पङ्कजे। अतोऽर्थं विधिवत् कार्य्या मनुष्यैः सुखसुप्तिका। दिवा तत्र न भोक्तव्यमृते बालातुरान् जनान्। प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात्। दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च। चतुष्पथे श्मशानेषु नदीपर्वतवेश्मसु। वृक्षमूलेषु गोष्ठेषु चत्वरेषु गुहासु च। वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः। दीपमालापरिक्षिप्ते प्रदेशे तदनन्तरम्। ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान्। स्वलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना। स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्निभृतैः सह। शङ्करस्तु पुरा द्यूतं ससर्ज सुमनोहरम्। कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि सुव्रत !। जितश्च शङ्करस्तत्र जयं लेभे च पार्वती। अतोऽर्थं शङ्करो दुःखी उमा नित्यं सुखोषिता। तस्माद् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः। तस्मिन् भवेज्जयो यस्य तस्य संवत्सरं शुभम्। पराजये विरुद्धन्तु लब्धनाशस्ततो भवेत्। श्रोतव्यं गीतवाद्यादि स्वनुलिप्तैः स्वलङ्कृतैः। विशेषवस्त्रं भोक्तव्यं प्रशस्तैर्बान्धवैः सह। तस्यां निशायां कर्त्तव्यं शय्यास्थानं सुशोभनम्। गन्धपुष्पैस्तथा वस्त्रै रत्नैर्माल्यैरलङ्कृतम्। दीपमालापरिक्षिप्तं तथा धूपेन धूपितम्। दयिताभिश्च सहितैर्नेया सा च भवेन्निशा। नवैर्वस्त्रैश्च संपूज्य द्विजसम्बन्धिबान्धवान्” इत्यादि।

सुगतिव्रतं पद्मपु० “नक्ताशी त्वष्टमीषु स्याद् वत्सरान्ते तु गोप्रदः। पौरन्दरपदं याति सुगतिव्रतमुच्यते”।

सुगतिद्वादशीव्रतं विष्णुधर्म्मोत्तरे “एकादश्यां शुक्लपक्षे फाल्गुने मासि यो नरः। जपन् कृष्णेति देवस्य नाम भक्त्या पुनः पुनः। देवार्च्चनं वाष्टशतं कृत्वैतत्तु जपेच्छुचिः। स्नाने प्रस्थानकाले च उत्थाने स्खलिते क्षये। पाषण्डान् ! पतितांश्चैव तथैवान्यावसायिनः। नालपेत्तु तथा देवमर्च्चयेच्छ्रद्धयान्वितः। इदञ्चोदाहरेत् मन्त्रं मनश्चाधाय तत्परः। चैत्रवैशाखयोश्चैवं तद्वज्ज्यैष्ठे च पूजयेत्। मर्त्यलोके गतिं श्रेष्ठां दाल्भ्य ! प्राप्नोति वै नरः। उत्क्रान्तिकाले कृष्णस्य स्मरणञ्च तथाप्नुयात्। आषाढ़े श्रावणे चैव मासि भाद्रपदे तथा। तथैवाश्वयुजे देवमनेन विधिना नरः। उपोष्य संपूज्य तथा